देवालयः ॥ (यथा, कथासरित्सागरे । ४।१०२।
"शून्ये देवगृहे देहमिन्द्रदत्तस्य रक्षितुम् ॥")

देवचिकित्सकौ, पुं, (देवानां चिकित्सकौ ।) अश्विनीकुमारौ । इति हलायुधः ॥ द्विवचनान्तोऽयम् ॥

देवच्छन्दः, पुं, (देवैश्छन्द्यते आकाङ्क्ष्यते इति । छन्द + घञ् ।) हारविशेषः । स शतयष्टिकः । इत्यमरः । २ । ६ । १०५ ॥ अष्टोत्तरशतयष्टिकोऽयमिति केचित् । इति भरतः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३२ ।
"शतमष्टयुतं हारो देवच्छन्दो ह्यशीतिरेकयुता ।
अष्टाष्टकोऽर्द्धहारो रश्मिकलापश्च नवषट्कः॥")

देवजग्धं, क्ली, (देवैरद्यते इति । अद् + क्तः । "अदोजग्धिर्ल्यप्तिकिति ।" २ । ४ । ३६ । इति जग्धादेशः ।) देवजग्धकम् । इति हेमचन्द्रः । ४ । २५७ ॥

देवजग्धकं, क्ली, (देवजग्ध + स्वार्थे कन् ।) कत्तृणम् । इत्यमरः । २ । ४ । १६६ ।

देवटः, त्रि, (दिव्यतीति । दिव + "शकादिभ्योऽटन् ।" उणां । ४ । ८१ । इति अटन् ।) शिल्पी । इत्युणादिकोषः ॥

देवट्टी, स्त्री, (देवं देवशब्दं अट्टते अतिक्रामतीति । अट्ट + अण् । शकन्ध्वादित्वादलोपः । गौरादित्वात् ङीष् ।) गङ्गाचिल्ली । इति हारावली । ८५ ॥

देवतरुः, पुं, (देवानां तरुः ।) मन्दारः । पारिजातः । सन्तानः । कल्पवृक्षः । हरिचन्दनम् । इत्यमरः । १ । १ । ५३ ॥ चैत्यवृक्षः । इति त्रिकाण्डशेषः ॥

देवता, स्त्री, (देव एव । स्वार्थे तल् ।) देवं द्युतिं क्रीडां वा तनोति या । तत्पर्य्यायः । अमरः २ निर्ज्जरः ३ देवः ४ त्रिदशः ५ विबुधः ६ सुरः ७ सुपर्व्वा ८ सुमनाः ९ त्रिदिवेशः १० दिवौकाः ११ आदितेयः १२ दिविषत् १३ लेखः १४ अदितिनन्दनः १५ आदित्यः १६ ऋभुः १७ अस्वप्नः १८ अमर्त्यः १९ अमृतान्धाः २० बर्हिर्मुखः २१ क्रतुभुक् २२ गीर्व्वाणः २३ दानवारिः २४ वृन्दारकः २५ दैवतम् २६ । इत्यमरः ।१।१।९॥ स्वाहाभुक् २७ दनुजद्विट् २८ द्युषत् २९ द्यौषत् ३० स्वर्गी ३१ शोभः ३२ निलिम्पः ३३ सुचिरायुः ३४ स्थिरः ३५ । इति शब्दरत्नावली ॥ तस्याः संख्य. त्रयस्त्रिंशत्कोटयः । यथा,—
"सदारा विबुधाः सर्व्वे स्वानां स्वानां गणैः सह ।
त्रैलोक्ये तत्त्रयस्त्रिंशत्कोटीसंख्या यथा भव ॥"
इति पाद्मोत्तरखण्डम् ॥ *

गणदेवता यथा,—
"आदित्यास्तुषिता विश्वसाध्याभास्वरमारुताः ।
महाराजिकरुद्राश्च वसवो गणदेवताः ॥
आदित्या द्वादश प्रोक्तास्तुषितास्त्रिंशदेव हि ।
विश्वेदेवा दश प्रोक्ताः साध्या द्वादश कीर्त्तिताः ॥
आभास्वरास्तु:षष्टिर्वाताः पञ्चाशदूनकाः ।
महाराजिकनामानो द्वे शते विंशतिस्तथा ।
रुद्रा एकादश प्रोक्ता वसवोऽष्टौ समीरिताः ॥"
इति शब्दरत्नावली ॥ * ॥

तेषां चत्वारो वर्णा यथा,—
"आदित्याः क्षत्त्रियास्तेषां विशश्च मरुतस्तथा ।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ ॥
स्मृतास्त्वाङ्गिरसा देवा ब्राह्मणा इति निश्चयः ।
इत्येतत् सर्व्वदेवानां चातुर्व्वर्ण्यं प्रकीर्त्तितम् ॥"
इति महाभारते मोक्षधर्म्मः ॥ * ॥

वैष्णवानां पञ्चदेवता यथा,—
"यत्र यत्र सुराः पूज्या गणेशाद्यास्तु कर्म्मिणाम् ।
विष्ण्वर्च्चने तत्र तत्र वैष्णवानां हि वैष्णवाः ॥
विष्वक्सेनं ससनकं सनातनमतःपरम् ।
सनन्दं सनत्कुमारञ्च पञ्चैवं पूजयेत्ततः ॥"
इति पाद्मे उत्तरखण्डम् ॥ * ॥

देवषट्कं यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
देवषट्कञ्च संपूज्य नमस्कृत्य विचक्षणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

अपि च ।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम् ।
नारायणं विशुद्धाख्यमन्ते च कुलदेवताः ॥"
इत्याह्निकतत्त्वम् ॥ * ॥

व्यक्तिविशेषस्य उपास्यदेवता यथा,—
"या यस्याभिमता पुंसः सा हि तस्यैव देवता ।
किन्तु कार्य्यविशेषेण पूजिता चेष्टदा नृणाम् ॥
विशेषात् सर्व्वदा नायं नियमो ह्यन्यथा नृपाः ।
नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः ॥
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक् ।
देवानां दैवतं विष्णुर्दानवानां त्रिशूलभृत् ॥
गन्धर्व्वाणां तथा सोमो यक्षाणामपि कथ्यते ।
विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः॥
रक्षसां शङ्करो रुद्रः किन्नराणाञ्च पार्व्वती ।
ऋषीणां दैवतं ब्रह्मा महादेवश्च शूलभृत् ॥
मनूनां स्यादुमा देवी तथा विष्णुः सभास्करः ।
गृहस्थानाञ्च सर्व्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम् ॥
वैखानसामम्बिका स्याद्यतीनाञ्च महेश्वरः ।
भूतानां भगवान् रुद्रः कुष्माण्डानां विनायकः ॥
सर्व्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः ।
इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत ॥"
इति कूर्म्मपुराणम् ॥ * ॥

सामान्यदेवघट्टनदिनं यथा,—
तत्रोक्तनक्षत्राणि । उत्तरफल्गुन्युत्तराषाढ़ोत्तरभाद्रपदोहिणी चित्रानुराधा मृगशिरो रेवती पुष्योऽश्विनी हस्ता शतभिषा श्रवणा स्वाती पुनर्व्वसुर्धनिष्ठा । तत्र तिथयः शुभाः । तत्र चन्द्रस्तृतीयदशमसप्तमजन्मैकादशस्थः शोभनः ॥ अथ सामान्यदेवप्रतिष्ठादिनम् । तत्र मासाः । माघफाल्गुनचैत्रवैशाखज्यैष्ठाः हरिशयनात् पूर्व्वमाषाढ़श्च । तत्र नक्षत्राणि धनिष्ठाशतभिषाश्लेषामघापुनर्व्वस्वश्विनीभरणीकृत्तिकाविशाखाभिन्नानि । तत्र तिथयः शुभाः । तत्र लग्नानि वृषमिथुनकन्याधनुर्मीनसंज्ञकानि । तत्र चन्द्रः शोभनः । लग्नापेक्षया बृहस्पतिः केन्द्रस्थः शोभनः लग्नापेक्षया शुक्रस्तृतीयषष्ठैकादशस्थः शोभनः । इति ज्योतिषम् ॥ (देव + भावे तल् । देवत्वम् । यथा, ऋग्वेदे । १० । २४ । ६ ।
"मधुमन्मे परायणं मधुमत् पुनरायनम् ।
ता नो देवा देवतया युवं मधुमतस्कृतम् ॥"
"हे देवा देवौ द्योतमानौ ता तौ युवं युवां नोऽस्मान् मधुमतः प्रीतियुक्तान् कृतम् कुरुतम् । केनेति उच्यते । देवतया देवत्वेन अणिमादिदेवतैश्वर्य्ययोगेनेत्यर्थः ।" इति तद्भाष्ये सायनः ॥)

देवताड़ः, पुं, (देवो दीप्तस्ताल इति । लस्य डः ।) वृक्षविशेषः । देताड़ा इति ख्यातः । तत्पर्य्यायः । वेणी २ खरा ३ गरी ४ जीमूतः ५ । इत्यमरः । २ । ४ । ९९ ॥ अगरी ६ खरागरी ७ गरागरी ८ । इति तट्टीकायां भरतः ॥ देवताड़ी ९ आखुविषहा १० । इति जटाधरः ॥ आखुः ११ विषजिह्वः १२ महाच्छदः १३ कदम्बः १४ खुण्याकः १५ देवताड़कः १६ । इति रत्नमाला ॥ (देवौ चन्द्रार्कौ ताड़यतीति । ताड़ि + कर्म्मणि अण् ।) राहुः । अग्निः । इति मेदिनी । ड़े, ३९ ॥ घोषकलता । इति विश्वः ॥

देवताड़कः, पुं, (देवताड़ + स्वार्थे कन् ।) देवताड़ः । इति रत्नमाला ॥

देवताधिपः, पुं, (देवतानां अधिपः ।) इन्द्रः । इति शब्दरत्नावली ॥

देवत्वं, क्ली, (देवस्य भावः कर्म्म वा । "तस्य भावस्त्वतलौ ।" ५।१।११९ । इति त्वप्रत्ययः ।) देवभूयम् । देवसायुज्यम् । इत्यमरः ।२।७।५२॥ देवस्य भावः कर्म्म वा । इति संक्षिप्तसारव्याकरणम् ॥

देवदण्डा, स्त्री, (देवात् मेघाद्दण्डोऽस्याः ।) नागबला । इति राजनिर्घण्टः ॥

देवदत्तः, पुं, बुद्धानुजः । इति त्रिकाण्डशेषः । अर्ज्जुनशङ्खः । (यथा, महाभारते ।६।२४।१५ ।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥")
शरीरवाह्यपञ्चवाय्वन्तर्गतवायुविशेषः । इति शब्दार्थकल्पतरुः ॥ विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः । इति सारदातिलकटीका ॥ (देवा एनं देयासुरिति । "क्तिच्क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति आशिषि क्तः । "दो दद्घोः ।" ७।४।४६ । इति ददादेशश्च ।) संज्ञाविशेषः । यथा, देवदत्तादिसंज्ञाशब्दस्य सर्व्वलिङ्गभाक्त्वाभावात् जातित्वमायाति । इति दुर्गादासः ॥ (नागभेदः । यथा, भागवते । ५ । २४ । ३१ । "ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षाः निवसन्ति ॥" देवेन दत्ते, त्रि । यथा,
"अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ।